उममहेश्वराष्टकं (संघिल कृतं)

उममहेश्वराष्टकं (संघिल कृतं)

पितामहशिरच्छेदप्रवीणकरपल्लव |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वर || 1 ||

निशुंभशुंभप्रमुखदैत्यशिक्षणदक्षिणे |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वरि || 2 ||

शैलराजस्य जामातः शशिरेखावतंसक |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वर || 3 ||

शैलराजात्मजे मातः शातकुंभनिभप्रभे |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वरि || 4 ||

भूतनाथ पुरारते भुजंगामृतभूषण |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वर || 5 ||

पादप्रणतभक्तानां पारिजातगुणाधिके |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वरि || 6 ||

हालास्येश दयामूर्ते हालाहललसद्गळ |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वर || 7 ||

नितंबिनि महेशस्य कदंबवननायिके |
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं महेश्वरि || 8 ||

इति श्रीहालास्यमाहात्म्ये संघिलकृतं उमामहेश्वराष्टकं |